# 45 - पञ्चचत्वारिंश दशकम्

## कृष्णस्य बाल लीला

अयि सबल मुरारे पाणि जानु प्रचारैः
किमपि भवन भागान् भूषयन्तौ भवन्तौ ।
चलित चरण कञ्जौ मञ्जु मञ्जीर शिञ्जा
श्रवण कुतुक भाजौ चेरतुश् चारु वेगात् ॥ ॥45-1॥

मृदु मृदु विहसन्तौ उन्मिषद् दन्तवन्तौ
वदन पतित केशौ दृश्य पादाब्ज देशौ ।
भुज गलित करान्त व्याल गत् कङ्कणाङ्कौ
मति महरत मुच्चैः पश्यतां विश्व नृणाम् ॥ ॥45-2॥

अनुसरति जनौघे कौतुक व्याकुलाक्षे
किमपि कृत निनादं व्याहसन्तौ द्रवन्तौ ।
वलित वदन पद्मं पृष्ठतो दत्त दृष्टी
किमिव न विदधाथे कौतुकं वासुदेव ॥ ॥45-3॥

द्रुतगतिषु पतन्तौ उत्थितौ लिप्त पङ्कौ
दिवि मुनिभि रपङ्कैः सस्मितं वन्द्यमानौ ।
द्रुत मथ जननीभ्यां सानुकम्पं गृहीतौ
मुहु रपि परिरब्धौ द्राग्युवां चुम्बितौ च ॥ ॥45-4॥

स्नुत कुच भरमङ्के धारयन्ती भवन्तं
तरलमति यशोदा स्तन्यदा धन्यधन्या ।
कपट पशुप मध्ये मुग्ध हासाङ्कुरं ते
दशन मुकुल हृद्यं वीक्ष्य वक्त्रं जहर्ष ॥ ॥45-5॥

तदनु चरण चारी दारकैस् साक मारात्
निलय ततिषु खेलन् बाल चापल्य शाली ।
भवन शुक विडालान् वत्सकांश्चानु धावन्
कथमपि कृतहासैः गोपकैर् वारितोऽभूः ॥ ॥45-6॥

हलधर सहितस् त्वं यत्र यत्रोप यातः
विवश पतित नेत्राः तत्र तत्रैव गोप्यः ।
विगलित गृह कृत्याः विस्मृ तापत्य भृत्या
मुरहर मुहु रत्यन्ताकुला नित्य मासन् ॥ ॥45-7॥

प्रतिनव नवनीतं गोपिका दत्त मिच्छन्
कलपद मुपगायन् कोमलं क्वापि नृत्यन् ।
सदय युवति लोकैः अर्पितं सर्पि रश्नन्
क्वचन नव विपक्वं दुग्धमप्या पिबस् त्वम् ॥ ॥45-8॥

मम खलु बलि गेहे याचनं जात मास्ताम्
इह पुन रबलानाम् अग्रतो नैव कुर्वे ।
इति विहित मतिः किं देव सन्त्यज्य याञ्चाम्
दधि घृत महरस् त्वं चारुणा चोरणेन ॥ ॥45-9॥

तव दधि घृत मोषे घोष योषा जनानाम्
अभजत हृदि रोषो नावकाशं न शोकः ।
हृदय मपि मुषित्वा हर्ष सिन्धौ न्यधास् त्वं
स मम शमय रोगान् वात गेहाधि नाथ ॥ ॥45-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥